Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# द्वन्द्वसमासलक्षणं तद्भेदाश्च

कैलाश चन्द्र बुनकर
प्राचार्य, राजकीय लक्ष्मीनाथ शास्त्री संस्कृत, महाविद्यालय,चीथवाड़ी, जयपुर।

**Article Info**
Volume 4, Issue 1
Page Number : 263-274
Publication Issue :
January-February-2021
**Article History**
Accepted : 01 Jan 2021
Published : 10 Jan 2021

**शोधसारांश:** – अन्तरङ्गत्वाद्विभक्त्युत्पत्तेः प्रागित्यर्थः। तेनेति। द्वन्द्वत्वसमासत्वयोरभावेनेत्यर्थः। एकवदिति। द्वन्द्वश्च प्राणी'त्येतत्कृतो नियम इत्यर्थः। पन्थानाविति। 'इतोऽत्' इति सूत्रन्तु पन्था इत्यत्र, मथिनादौ च चरितार्थम्। कृतद्वन्द्वानामेकशेषे हि द्वन्द्वाऽलौकिकविग्रहवाक्ये ऋक्पूरित्यनेन तत्प्राप्तिर्दुर्वारा । एवञ्च वैरूप्यादेकशेषो न स्यात्। एकं पथीति, अपरं पथेति। न चोत्तरमनर्थकम्, विशिष्टरूपोपादानाऽभावेन सरूपसूत्रेऽर्थवत्परिभाषाया अप्रवृत्तेः। एवषैतद्भाष्ययोजनार्थमुत्तरपदावयवत्वस्वीकारः कैयटोक्तो विफल एव। किञ्चैवंयाणामपीत्येकशेषस्य दुर्वारत्वाद्भाष्याऽसङ्गतिः। मम तूत्तरखण्डस्याऽनर्थकत्वान्नतत्प्राप्तिरिति भावः।

**मुख्यशब्दः** –द्वन्द्वसमासः लक्षणम् तद्भेदः सूत्रम्।

प्रायेण उभयपदार्थप्रधानः द्वन्द्वः इति द्वन्द्वसमासलक्षणम्। अयं द्वन्द्वसमासःचार्थे भवति । तदुक्तम् सिद्धान्तकौमुद्याम् –"चार्थे द्वन्द्वः[1] समासप्रकरणे इदम् एकाधिकशततमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं व्याख्याति – प्रागनुक्तसमासमनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। परस्परनिरपेक्षस्यानेकस्यैकस्मिन्प्रति सम्बन्धिन्यन्वयः समुच्चयः। यदा तु एकस्य प्राधान्यमितरस्यानुषङ्गिकता तदाऽन्वाचयः। यथा भिक्षामट, गा चानयेति। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्र समुच्चयान्वाचयोर्न समासः, असामर्थ्यात्। एकार्थीभावे हि सति 'पुष्पवन्तौ पश्य' इत्यादाविव एकपदोपात्तौ मिलितावेव अन्वियातां, न तु प्रत्येकम्। शेषः किम्? नीलोत्पलम् । इह हि एकस्मिन धर्मिणि अनेकधर्मसमुच्चयाद् द्वन्द्वः स्यात्। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयत्राह– अनेकमिति वर्तते। अनेकं सुबन्तं चार्थे वर्तमानं समस्यते, द्वन्द्वसंज्ञश्चसमासो भवति समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। तत्र समुच्चयान्वाचययोरसामर्थ्यात् नास्ति समासः। इतरेतरयोगे समाहारे च समासो विधीयते। प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ। धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः। वाक्क त्वक्व वाक्त्वचम् । वाग्दृषदम् । द्वन्द्वप्रदेशाः – "द्वन्द्व च'' इत्येवमादयः।यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण सूत्रस्यार्थंविवेचयति, तस्य काशिकाकारः अनुकरणं करोति। द्वयोर्ग्रन्थयोर्मध्ये नास्ति कोऽपिभेदः विषयदृष्ट्या । येन सूत्रार्थावगमने सौकर्यं भवति।

समुच्चय–अन्वाचय–इतरेतरयोग–समाहार इति चतुर्षु अर्थेषु समुच्चयअन्वाचय च अर्थे सामर्थ्याभावात् समासो न भवति। इतरेतरयोगे समाहारे च अर्थेसमासो भवति। इतरेतरयोगद्वन्द्वसमासे विग्रहे प्रयुक्तानां पदानां संख्यानुसारेण वचनंविग्रहवाक्य प्रयुक्तस्य अन्तपदस्यानुस्वारे लिङ्गमप्रयुज्यते । तथाहि सूत्रम् – "परवल्लिङ्गद्वन्द्वतत्पुरुषयोः" इति। तथा हरिः च हरः च इति हरिहरौ।

समाहारद्वन्द्वे नपुसंकलिङ्गं भवति। एकवचनं भवति। तथाहि सूत्रम् – सनपुंसकम्, द्विगुरेकवचनञ्च। सञ्ज्ञा च परिभाषा च इति संज्ञापरिभाषम् । नपुंसकत्वात् अन्त्यस्य स्वरवर्णस्य ह्रस्वत्वम् । तथाहि सूत्रम् – ह्रस्वो नपुंसके प्रातिपदिकस्य इति। इदानी द्वन्द्वसमासप्रकरणस्य प्रत्येकं सूत्रं व्याख्यायते।

द्वन्द्वसमासे पूर्वपदप्रयोगस्य केचन नियमाः वर्तन्ते। अतः नियमानुसारमवसमास पूर्वपदस्य प्रयोगो भवति । यद्यपि समासे उपसर्जनसंज्ञकस्य एव पर्वप्रयोगोभवति तथाहि सूत्रम् –"उपसर्जनं पूर्वम्''[2]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

समासप्रकरणे इदं द्वयधिकशततमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - समासे उपसर्जनं पर्वं प्रयोज्यम्। कृष्णश्रितः।काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- समास इति वर्तते। उपसर्जनसंज्ञकं समासे पूर्वं प्रयोक्तव्यम्। पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् । अनियमो हि स्यात्। द्वितीया-कृष्णश्रितः। तृतीया-शङ्कुलाखण्डः। चतुर्थी - यूपदारू। पञ्चमीवकभयम्। षष्ठी- राजपुरुषः। सप्तमी- अक्षशौण्डः। एवं दृश्यते यत्र विषयेऽस्मिन् शब्दकौस्तभकारः भट्टोजिदीक्षितः सरलभाषायां सोदाहरणं सूत्रस्यार्थं करोति, तस्य काशिकाकारः विस्ततृतया विवेचनं कृत्वा सरलभाषायाम् अर्थं करोति तथा प्रितिविभक्तेः उदाहरणानि प्रस्तौति, येन सूत्रार्थावगमने सौकर्यं भवति।"राजदन्तादिषु परम्"[3]समासप्रकरणे इदं त्र्यधिकशततमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितःसूत्रस्यास्यार्थं करोति- एषुपूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः। वनस्याग्रे अग्रेवणम्। "वनम्पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः[4] इत्यादिना णत्वम्। इहैव गण निपातनादलुक। एवञ्चालुगिव णत्वमप्यस्तु। तथा च तत्र सूत्रे अग्रग्रहण शक्यमकर्तुम् । आकृतिगणोऽयम्। धर्मादिष्वनियम इष्यते। अर्थधर्मौ, धर्मार्थावित्यादि। गणमध्य एव जम्पतीदम्पतीजायापतीति पाठात् जायाशब्दस्य जम्भावो दम्भावश्च वानिपात्यते।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- पूर्वनिपाते प्राप्ते परप्रयोगार्थं । राजदन्तादिषु परमुपसर्जनं प्रयोक्तव्यम्। न केवलमुपसर्जनस्य, अन्यस्याप व विहितस्य पूर्वनिपातस्यापवादः। परनिपातो विधीयते। दन्तानां राजा राजदन्तः। वनस्याग्रे अग्रेवणम्, निपातनादलुक्। राजदन्तः। अग्रेवणम् । लिप्तवासितम्।दानमषितम्। सिक्तसंमृष्टम्। मृष्टलुञ्चितम्। अवक्लिन्नपक्वम्। अर्पितोप्तम्। उप्तगाढम् ।पर्वकालस्य परनिपातः। उलूखलमुसलम्। तण्डुलकिण्वम्। दृषदुपलम् । आरग्वायनबन्धकी। चित्ररथबाह्लीकम्। आवन्त्यश्मकम्। शूद्रार्यम्। स्नातकराजानौ ।विष्वक्सेनार्जुनौ। अक्षिभ्रुवम्। दारागवम्। शब्दार्थौ। धर्मार्थौ। कामार्थौ । अनियमश्चात्रेष्यते। अर्थशब्दौ। अर्थधर्मौ। अर्थकामौ। तत्कथम्? वक्तव्यमिदम् - धर्मादिषूभयमिति । वकारिकतम। गजबाजम् । गोपालधानीपूलासम्। पूलासककरण्डम् । स्थूलपूलासम्। उशीरबीजम्। सिञ्जास्थम्। चित्रास्वाती। भार्यापती। जायापती। जम्पती। दम्पती। जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते। पुत्रपती। पुत्रपशू। केशश्मश्रू। श्मश्रुकेशौ। शिरोबीजम्। सर्पिर्मधुनी। मधुसर्पिषी। आद्यन्तौ। अन्तादी। गुणवृद्धी। वृद्धिगुणौ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण सूत्रस्यार्थं व्याख्याति, तस्य काशिककारः प्रतिपदं विवेचयित्वा अर्थं प्रतिपादयति, काशिकाकारः उदाहरणानाम् आधिक्येन सूत्रस्यार्थं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।"द्वन्द्वे घि"[5]सासप्रकरणे इदं चतुश्शततमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं व्याख्याति - द्वन्द्वे घ्यन्तं प्राक् स्यात्। हरिहरौ। अनेकप्राप्तावेकत्रनियमोऽनियमः शेषे (का. वा.)। हरिगुरुहराः। हरिहरगुरुवः। हरश्च हरिगुरुः चेति विग्रहे तु हरस्य पूर्वनिपातः, अल्पान्तरत्वात् ।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह - पूर्वमिति वर्त्तते। द्वन्द्वे समासे प्यन्तं पूर्व प्रयोक्तव्यम्। पटुगुप्तौ । मृदुगुप्तौ । अनेकप्राप्तावेकस्य नियमः, शेषे त्वनियमः। पटुशुक्लाः । पटुशुक्लमृदवः। द्वन्द्व इति किम्? विस्पष्टपटुः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः सामान्यरूपेण सूत्रस्यार्थंप्रतिपादयति, तस्य काशिकाकारः प्रतिपदमर्थं करोति, ततः परं सामान्यभाषायाम् अर्थं बख्याति, येन सूत्रार्थावगमने सौकर्यं भवति ।

"अजाद्यदन्तम्"[6] समासप्रकरणे इदं पञ्चाधिकशततमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - इदं द्वन्द्वे पूर्वं स्यात्। बहुष्वनियमः। अवरथेन्द्राः, इन्द्राश्वरथाः। (घ्यन्तादजाद्यदन्तं विप्रतिषेधेन) (का.वा.)। इन्द्राग्नी।काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह - द्वन्द्व इति वर्त्तते। अजाद्यदन्तं"शब्दरूप द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम्। उष्ट्रखरम्। उष्ट्रशशकम्। (बहुष्वनियमः)।

अश्वरथेन्द्राः। इन्द्ररथाश्वाः। (द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन)। इन्द्राग्नी। इन्द्रवायू। तपकरणं किम्? अश्वावृषौ, वृषाश्वे इति वा।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण सूत्रस्यार्थ पादयति, तस्य काशिकाकारः बहूदाहरणानां माध्यमेन सूत्रस्यार्थं विवेचयति, येनसूत्रार्थावगमने सौकर्यं भवति।

"अल्पान्तरम्'[7]समासप्रकरणे इदं षडधिकशततमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - अत एव निपातनात्स्वार्थे तरप् कुत्वचुत्वयोरभावश्च। द्वन्द्वे अल्पाच् पूर्वं स्यात्। धवखदिरौ। ऋतुनक्षत्राणां समाक्षराणामानुपूर्वेण निपातो वक्तव्यः (का.वा.)। हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। समाक्षराणां किम्? ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वम् (का.वा.)। कुशकाशम्।

अभ्यर्हितञ्च। मातापितरौ। वर्णानामानुपूर्वेण (का.वा.)। ब्राह्मणक्षत्रियाविट्शूद्राः भ्रातुश्च ज्याजसः (का.वा.)। युधिष्ठिरार्जुनौ। संख्याया अल्पीयस्याः (का.वा.)। एतच्च द्वन्द्वाद्वन्द्वविषयकम्। द्वित्राः। द्वाविंशतिः।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- द्वन्द्व इति वर्तते। अल्पान्तरं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम्। प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । धवखदिरपलाशाः। बहुष्वनियमः। शंखदुन्दुभिवीणाः। वीणाशङ्खदुन्दुभयः।(ऋतुनक्षत्राणामानुपूर्व्यणसमानाक्षराणां पूर्वनिपातो वक्तव्यः)। हेमन्तशिशिरवसन्ताः।

चित्रास्वाती। कृत्तिकारोहिण्यौ। समानाक्षराणामिति किम्? ग्रीष्मवसन्तौ। (लघ्वक्षरंपूर्व निपततीति वक्तव्यम्)। कुशकाशम्। शरशादम्। (अभ्यर्हितं च पूर्वनिपतीतिवक्तव्यम्)। मातापितरौ। श्रद्धामेधे। दीक्षातपसी। (वर्णानामानुपूर्व्येण पूर्वनिपातः)।ब्राह्मणक्षत्रियविट्शूद्राः। समानाक्षराणामित्यत्र नास्ति। (भ्रातुश्च ज्यायसः पूर्वनिपातो वक्तव्यः)। युधिष्ठिरार्जुनौ। (संख्यायाअल्पीयस्याः पूर्वनिपातो वक्तव्यः)। द्वित्राः।त्रिचतुराः । नवतिशतम्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृततया सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकारः अनुकरणं करोति, अधिकसंख्यायाम् उदाहरणानि प्रस्तौति, येन पर्यालोचनेन सूत्रार्थावगमने सौकर्यं भवति।

तत्त्वबोधिन्यां सिद्धान्तकौमुद्याः क्रमानुसारं चार्थे द्वन्द्वः इति सूत्रे चकारपदार्थं विवेच्य समुच्चयादिपदानां विस्तृतव्याख्यानं विहितम् । तथाहि -चार्थे द्वन्द्वः। 'अनेकमन्यपदार्थे' इतयतोऽनेकमित्यनुवर्तते, 'सुबामन्त्रिते-'इत्यस्मात्सुबपि। 'समासः' इति, 'विभाषा' इति चाऽधिक्रियत एव। तदाह- अनेकसुबन्तमित्यादि। चार्था इति। चशब्दद्योत्या इत्यर्थः। एकस्मिन्निति। भजनादावित्यर्थः। ईश्वरं गुरं च भजस्वेति। क्रियायां द्रव्ययोः समुश्चयोऽयम्। तथा राज्ञो गजश्चाश्वश्चेति द्रव्ये द्रव्ययोः समुच्चयः। पटः शुक्लो रक्तश्चेति द्रव्ये गुणयोः। रक्तः पटः कुण्डलं चेति गुणे द्रव्ययोरित्यूह्यम्। भिक्षामट गां चानयेति। अत्रह्यदर्शनादामनानयन्नपि भिक्षामटत्येव। अनटस्तु भिक्षां न गामानयति। तथा अटनपिनाऽन्विष्य गामानयति। अतो भिक्षाऽटनस्यैव प्राधान्यं, गवानयनस्य त्वा ङ्गिकता।

असामर्थ्यादिति। एकार्थीभावाऽभावादित्यर्थः। तथाहि बहुव्रीहिघटकपदानांकर्मान्द्यन्तर्भाविणेव द्वन्द्वघटकपदानां चार्थान्तर्भाविण एकार्थीभाव आवश्यकः, 'समर्थःपदविधिः' इति परिभाषिततत्वात्, 'चार्थे द्वन्द्वः' इत्युक्तेश्च। न चेतरेतरान्वेय परस्परनिरपेक्षाणामेकार्थीभावः संभवति येन समुच्चयान्वाचयावेकार्थीभावान्तर्भूतौ स्याताम्। ततश्चेतरयोगे समाहारे च परस्परसाहित्यसत्त्वात्समासो भवति, न तु समुच्चयान्वाचययोः। परं त्वितरेतरयोगे साहित्यं विशेषणं, द्रव्यं तु विशेष्यं, समाहारे तु साहित्यं प्रधानं, द्रव्यं विशेषणमिति विवेक्तव्यम्। ननु 'नीलोत्पल 'मित्यादौ चशब्दान्तर्भाविण विग्रहदर्शनादेकार्थीभावसत्त्वाच्च द्वन्द्वो दुर्वारः स्यात्। मैवम्। 'विशेषणं विशेष्येणे 'ति सामानाधिकरण्ये विहितया तत्पुरुषसंज्ञया द्वन्द्वसंज्ञाया बाधात् ।

तस्यास्त्वसामानाधिकरण्ये सावकाशत्वात्। सामानाधिकरण्याऽभावविवक्षायां तु'प्रमाणप्रमेये 'त्यादाविव नीलोत्पलादावपि द्वन्द्वे इष्टापत्तिरेव। होतृपोत्रिति। उत्तरपदपरत्वाऽभावादनयोरानङ् च। राजदन्तादिषु। इह द्वन्द्व तत्पुरुषयोः पाठेऽपि 'अर्थधर्मौ' इत्याद्यभिप्रायेणाऽस्य द्वन्द्वेषूपन्यासः। द्वन्द्वे घि। 'अनेक मिति सर्वेषामेवप्रथमानिर्दिष्टत्वेनोपसर्जनत्वाऽविशेषादनियमप्राप्तावयमारम्भः। यत्र त्वनेकं घ्यन्तं तत्रद्वयोरपि पूर्वनिपातनियमः स्यादत आह- अनेकप्राप्तावेकोति। अत्र व्याचख्यआकतौ पदार्थे समुदाये सकल्लक्षणं प्रवर्तते, न प्रतिव्यत्तयावृत्त्या। तत्रैकस्य पर्वनिपाते। सति जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते। व्यक्तिपक्षस्त्विह नाश्रीयते, लक्ष्यानुरोधादिति। हरिहरगुरव इति। हरगुरुशब्दयोनँ नियमः प्रवर्तत इति भवः ।।अजाद्यदन्तं। 'समुद्राभ्राद्धः' 'लक्षणहेत्वोः क्रियायाः' इत्यादिनिर्देशादनित्यमिदंप्रकरणम्। तेन 'स सौष्ठवौदार्यविशेषशालिनी 'मिति भारविप्रयोगः सङ्गच्छते। अल्पान्तरम्। अतएव निपातनात्स्वार्थे तरप्, कुत्वचुत्वयोरभावश्च। यदि तु प्रकर्षे तरम् स्यात्तदा द्वयोरेव नियमः स्यात्, द्विवचनान्तोपपदत्वविषय एव तरपो विधानात्। ततश्च 'धवरवदिरपलाशा' इत्यादौ बहुषु नियमो न स्यात्। ऋतुनक्षत्राणामिति। ऋतूनामानुपूर्व्यं प्रादुर्भावकृतं, नक्षत्राणां तूदयकृतम्। अभ्यर्हित च। 'वासुदेवार्जुनाभ्यां वुनि 'ति निर्देशेनेदं ज्ञाप्यत इति चतुर्थे भाष्यम्। 'अल्पान्तरम्' 'अजाद्यदन्त मिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकुर्वन् ज्ञापयति 'सर्वतोऽभ्यहितं पूर्व'मिति तत्रैव सूत्रे वक्ष्यते। युधिष्ठिरार्जुनाविति। इन्द्रपुत्रत्वाद्विष्णोरंशत्वाच्छूरत्वाद्वाऽभ्यर्हितत्व मर्जुनेऽप्यस्तीति न तेन नियमः सिध्यतीति भावः। द्वन्द्वश्च प्राणि। प्राणितूर्यसेनानामङ्गानीति बहुवचनान्तेनाऽङ्गशब्देन षष्ठीसमासः।

अङ्गशब्दश्च प्रत्येकमन्वेति। तेन प्राण्यङ्गानां प्राण्यङ्गैरेव, तूर्याङ्गानां तूर्याङ्गैरेव, सेनाङ्गानां सेनाङ्गैरेव यो द्वन्द्वः स एकवद्भवति न तु व्यतिरेकेण। तेनेह न-मार्दङ्गिकाश्वारोहौ। अत्र प्राणिसेनयोरङ्गं नामाऽवयवः। तूर्यस्य त्वङ्गं नामोपकारकं बोध्यम्। एषां द्वन्द्व

इति। प्राण्यङ्गानां द्वन्द्वः, तूर्याङ्गानां द्वन्द्वः, सेनाङ्गानां द्वन्द्व इत्यर्थः। द्विगुरेकवचन 'मित्यत एकवचनं वर्तते। तत्रैकं वक्तीति व्युत्पत्त्या एकत्वविशिष्टः समाहाररूपो। योऽर्थस्तत्प्रतिपादकः स्यादित्यर्थं मन्वानः फलितमाह-एकवत्स्यादिति। पाणिपादमिति। यद्यप्यत्र 'जातिरप्राणिना 'मित्येव सिद्धं, तथापि द्रव्यप्राधान्येऽपि भवत्विति प्राणिग्रहणमित्येके। प्राणिपणवाविति व्यतिकरे मा भूदिति नियमार्थं वचनमित्यन्ये। मार्दङ्गिकेति। मृदङ्गवादनं शिल्पमस्येत्यर्थे 'तदस्य शिल्प 'मिति ठक् ।।

एवं 'पाणविक' इत्यपि। रथिकाश्वारोहमिति। रथेन चरन्तीति रथिकाः। 'पर्पादिभ्यःष्ठन्निति ष्ठन्। ते चाश्वारोहाश्च तेषां समाहारः। ननु 'चार्थे द्वन्द्वः' इत्यनेन समाहारद्वन्द्वः सिद्धः तस्य चैकत्वादेकवचनमपि सिद्धमिति किमनेनेत्याशङ्‌क्याह- नियमार्थमिति। समाहार एवेति। 'समाहारे प्राण्यङ्गादीनामेवे 'ति विपरीतनियमोऽत्र न भवति,"तिष्यपुनर्वस्वो 'रिति सूत्रे बहुवचनग्रहणात्। तद्धि समाहारे एकवचनस्य द्विवचनं माभूदिति कृतम्। अन्यथा 'तिष्यपुनर्वस्वि'ति न स्यादिति। एवं च 'द्वन्द्वश्च प्राणितूर्ये 'ति प्रकरणबहिर्भूतानामपि समाहारद्वन्द्वो भवत्येव, तेन 'सर्वो द्वन्द्वो विभाषैकवद्भवती'तिपठ्यमानं नाऽपूर्वं वचनमिति ज्ञेयम्। चरणानामिति। शाखाध्येतृवाचिनामित्यर्थः। स्थेणोरिति। 'ष्ठा गतिनिवृत्तौ'। 'इण् गतौ'। स्थाप्रकृतिकइणप्रकृतिकलुङन्ते उपपदे सतीत्यर्थः। स्थेणोः किम् ? अभूवन् कठकालापाः। लुङिकिम् ? तिष्ठन्तु कठकालापाः। उदगादिति। इह यदा कठेषु कालापेषु च प्रतिष्ठितेषु उदितेषु चाऽऽवाभ्यां तत्र गन्तव्यमिति संकेतयित्वा तत्सङ्केतं विस्मृत्यासीनं प्रतीदमुच्यते। कठेन प्रोक्तमधीयते कठाः। वैशंपायनान्तेवासित्वाणिनिः। तस्य 'कठचरका 'दिति लुक् । अध्येत्रणस्तु 'प्रोक्ताल्लु'गिति लुक्। 'कलापिनोऽण्'। 'सब्रह्मचारी 'त्याधुपसङ्ख्यानाहिलोपः। यजुरिति। सूत्रे अध्वर्युशब्दो यजुर्वेदलक्षक इति भावः। पदकेति। पदान्यधीते पदकः। 'क्रमादिभ्यो वुन्'। एवं क्रमकोऽपि। पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टा प्रत्यासत्तिः। अध्ययनतः किम् ? पितापुत्रौ। अविप्रकृष्टेति किम् ? याज्ञिकनैयायिकौ। जातिर। जातिवाच्यवयवकद्वन्द्वोऽपि जातिरित्युपचर्यत इत्याशयेनाह- जातिवाचिनामिति। विट्शू द्रा इति। जातिप्राधान्येऽपि।

बहुवचनमुपपद्यते, 'जात्याख्यायामेकस्मि 'निति विधानात्। तेनात्र दयव्यङ्गविकलं नेतिभावः। द्रव्यजातीयानामेवेति। 'अप्राणिना 'मिति पर्युदासात् 'नञिवयुक्त'न्यायेन द्रव्यजातीयानामेकवद्भावो, न तु गुणक्रियाजातीयानामिति भावः। जातिः किम् ? नन्दकपाञ्चजन्यौ। संज्ञाशब्दावेतौ। जातिप्राधान्य एवेति। एतच्च जातिग्रहणाल्लब्धम्। अन्यथा पर्युदासेनैव जात्युपसर्जनद्रव्यवाचिनोऽपि ग्रहणोपपत्तौ किं तेनेति भावः।द्रव्यविशेषेति। नन्वेवं 'रञ्जिता नु विविधास्तरुशैलाः' इति भारविप्रयोगः सङ्गच्छतएवेति किमिति तरुसहिताः शैला इति मनोरमायां समर्थितमिति चेत्। अत्राहुःसकलतरुशैलरञ्जनं तत्र विवक्षितं, न तु केषांचित्तरुशैलविशेषाणामितिजातिप्राधान्यादेकवद्भावमाशय तथोक्तमिति।।

बदरामलकानीति। 'फले लु'गिति लुक्। 'लुक्तद्धितलुकी 'ति स्त्रीप्रत्ययस्यापि लुकि फलत्वजात्युपसर्जनद्रव्यवचनावेतौ। 'विभाषा वृक्षमृगे 'ति सूत्रे बदराणिचामलकानि च बदरामलकम्। 'जातिरप्राणिना 'मित्येकवद्भाव' इति वक्ष्यति, तत्तनाऽनेन ग्रन्थेन विरुध्यते। 'फलत्वजातिवाचिन बहुवचनान्तानामेव द्वन्द्व एकवद्भवति ।न त्वेकवचनान्तां द्वन्द्व' इति 'फलसेनावनस्पती'ति वार्तिकोक्तनियममुपेत्य तत्प्रवृत्तेः। विशिष्टलिङ्गो। सूत्रे चत्वारोऽपि शब्दा अवयवधर्मेणाऽवयवि द्वन्द्वे वर्तन्त इत्याशयेनाह-ग्रामेत्यादि। इह 'नदीवाचिनां द्वन्द्वः, 'देशवाचिनां द्वन्द्व' इति वाक्यभेदेनं व्याख्येयम्। तेन 'गङ्गाकुरुक्षेत्रे' इत्यत्र न भवति। देशशब्देनात्र प्रसिद्ध एव जनपदो। गृह्यते, नद्याः पृथग्ग्रहणात्। तेन पर्वतानां न, कैलासश्च गन्धमादनं च। कैलासगन्धमादने। नदीदेश इति किम् ? कुक्कुटमयूर्यो। विशिष्टपदस्याऽर्थमाहभिन्नलिङ्गानामिति। विपूर्वो हि शिषिर्भेदार्थः। अतएव 'विशेषणं विशेष्येणे'ति सूत्रे भेदकं भेद्येनेति व्याख्यातम। समाहारे द्वन्द्वः स्यादिति। निष्कर्षाभिप्रायेणेयमुक्तिः। यथाश्रुताभिप्रायेण तु 'द्वन्द्व एकवत्स्या'दिति केषु चित्सूत्रेषु व्याख्यायत इति ज्ञेयम्। उद्धयेरावतीति। उद्यो नदः, सोऽपि नदीविशेषत्वान्नदीशब्देन गृहीतः। एवं शोणोऽपि ।

'अग्रामा इत्यत्र नगरप्रतिषेधो वक्तव्यः । तेन 'मथुरापाटलिपुत्र 'मित्यत्र निषेधो नभवति,उभयोरपिनगरत्वात्।क्षुद्र।

अपचितपरिमाणत्वंक्षुदत्वम्। तच्चापेक्षिकत्वादनवस्थितम् । यच्च स्मर्यते- 'क्षुद्रजन्तुरनस्थिः स्यादथ वा क्षुद्र एव यः। शतं वा प्रसृतौ येषां, केचिदानकुलादपि' इति। तत्र सर्वपक्षसाधारण्येनोदाहरतियूकालिक्षमिति। आ नकुलादिति। नकुलपर्यन्ता इत्यर्थः। येषां च विरोधः। विरोधो वैरं, न तु सहानवस्थापनम् । तेनेह न- छायातपौ। 'शश्व'दित्यव्ययं त्रैकाल्ये वर्तते, तत्र भवः शाश्वतिकः। 'कालाकृञ् '। अतएव निपातनात् 'इसुसुक्तान्ता 'दिति कादेशः, 'अव्ययानां भमात्रे' इति इति टिलोपश्च न। शाश्वतिकः किम् ? 'देवासुरैरमृतमम्बुनिधिर्ममन्ये' । तेषां ह्यमृतादिप्रयुक्तः कादाचित्को विरोधो न तु नित्यः, मन्थनप्रवृत्तिकाले तद्विरहात्। परत्वादिति। पशुशकु निद्वन्द्वस्यावकाशो-गोमहिषंगोमहिषाः। हंसचक्रवाकं हंसचक्रवाकाः। 'येषां चे 'त्यस्यावकाशः-मार्जारमषकंश्रमणब्राह्मणमित्यादौ

ज्ञेयः। चकारेण बाध्यत इति। चकारः पुनर्विधायक इति भावः। शूद्राणां। त्रैवर्णिकेतरमनुष्यपरः शूद्रशब्दो न तु शूद्रत्वजातिपरः, 'अनिरवसिताना 'मिति निषेधात्। पात्रादिति। यैर्भुक्ते 'भस्मना शुध्यते कांस्य 'मित्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुध्यति तेषामित्यर्थः। गवाश्व। यथोच्चारितानीति। गणपाठे पाणिनिना यथा।

पठितानि तथैव साधूनीत्यर्थः। तेनाऽवङः पाक्षिकत्वाद्यदा नावङ् तदा उत्तरसूत्रेण विकल्पो न भवति। गोअश्वम्। 'अपशवो वा अन्ये गोअश्वेभ्यः, पशवो गोअश्वाः'। गवाश्वमिति। इह पशुद्वन्द्वे विभाषा प्राप्ता। दासीदासमिति। अत्र 'पुमान्स्त्रिये 'त्येकशेषो बाध्यते। विभाषा। विशेषाणामेवेति। अयं भावः- वृक्षादिशब्दैः प्रत्येकं द्वन्द्वो विशेष्यते, न चैको वृक्षशब्दो द्वन्द्वः, न च द्वयोः सह प्रयोगः, 'सरूपाणा 'मित्येकशेषात् । नापि पर्यायाणां, विरूपाणामपि समानार्थाना 'मित्येकशेषात् । नापि वृक्षश्च धवश्चेत्यादिसामान्यविशेषयोः, अनभिधानात्तत्र द्वन्द्वस्यैवाऽभावादिति।

सर्वप्रकरणशेषतया नियममाह- फलसेनेत्यादि। फलसेनादीनां द्वन्द्वो 'विभाषा वृक्षमृगे'त्यनेन, लक्षणान्तरेण वा एकवद्भवन्बहुप्रकृतिरेव एकवद्भवतीत्यर्थः। बहवो वर्तिपदार्थाः, बहुवचनान्ता वा-प्रकृतिः = कारणं यस्य स बहुप्रकृतिः। बदराणि चामलकानि चेति। 'जात्याख्यायामेकस्मिन्निति वैकल्पिकं बहुवचनम्। बदरामलके इति। जातिप्राधान्येऽप्येकवचनान्तर्योद्वन्द्व इति नास्त्येकवद्भाव इति भावः। पशुग्रहणमिति। 'विकल्पार्थ'मित्यनुषज्यते। 'चार्थे द्वन्द्वः' इत्यनेनैव सिद्ध मृगशकुनिग्रहणं व्यर्थमित्याशङ्कयाह- मृगाणां मृगैरेवेत्यादि। नपुंसकत्वार्थमिति। अयं भाव- पशुत्वाद्विकल्पे सिद्धे अश्ववडवग्रहणं प्रतिपदविधानामि । तेनाश्ववडवमित्येकवद्भावपक्षे 'पूर्ववदश्ववडवौ' इत्येतद्बाधित्वा 'स नपुंसक 'मित्येतदेवभवति। 'स' इति तच्छब्देन ह्येकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वमेकवद्भाववदेव प्रतिपदविहितं भवति। तथा च प्रतिपदोक्तस्य बलीयस्त्वान्नपुंसकत्वं सिध्यतीति। विप्रतिषिद्धम्। अधिकरणमिह द्रव्यम्। चकारोविभाषानुकर्षणार्थः। तदेतव्याचष्टे- विरुद्धार्थानामित्यादि। उदाहरणं तु-शीताष्णं, शीतोष्णे, सुखदुःखं, सुखदुःखे इत्यादि। विरोधोऽत्र सहानवस्थानलक्षणः। भवत्येवेति। विप्रतिषिद्धग्रहणाऽभावे तु स न स्यात्, 'अद्रव्यवाचिनामेवे 'ति नियमादिति भावः। अनधिकरणवाचीति किम् ? शीतोष्णे उदके स्तः। इह पाक्षिकः समाहारद्वन्द्वोऽपि स्यादिति दिक्। न दधिपय। दधिपयसी इति। व्यञ्जनत्वाद्विकल्पः प्राप्तः। एवं 'मधुसर्पिषी, 'सर्पिर्मधुनी' इत्यत्रापि बोध्यम्। इह 'ब्रह्मप्रजापती' शिववैश्रवणौ' इत्यादौ समाहारद्वन्द्वनिषेधमुखेनेतरेतरयोगद्वन्द्वोऽनेन व्यवस्थाप्यते। तत्साहचर्यादधिपयसी इत्यादावपि तथैव। तेन तत्र व्यञ्जनत्वप्रयुक्तविकल्पे निषिद्धेऽपि जातिलक्षणो नित्यमेकवद्भाधोऽस्त्विति न शङ्कनीयम्। किं च नेह लक्षणविशेषे आग्रहः, 'एतानि नैकवत्स्यु इत्येकवद्भावमात्रस्य निषेधात्, यथा 'न षट्स्वस्रादिभ्यः' इत्यत्र डीप्टापोरुभयोरपि निषेधसिद्धये 'स्त्रियां यदुक्तं तन्ने'ति सामान्यतो निषिध्यते इति दिक्। ऋक्सामे वाङ्मनसे इति। 'अचतुरे'त्यादिनाऽत्र समासान्तोऽचिपात्यते।

अधिकरणै। समासार्थस्याश्रयोऽधिकरणं = वर्तिपदार्थः, तस्यैतावत्त्वं - परिगणननियमः, तस्मिन्गम्यमान इति व्याचष्टे- द्रव्यसङ्ख्यावगमे इति। नियमो न स्यादिति। न चेह प्राण्यङ्गत्वात्प्राप्तस्य 'एकवदेवे'ति नियमस्य प्रतिषेधेऽपि 'चार्थे द्वन्द्वः' इति समाहारेद्वन्द्वः स्यादिति वाच्यं, 'सविशेषणानां वृत्तिर्ने 'त्यभ्युपगमेन समाहारेद्वन्द्वस्य प्राप्त्यभावात्। न चोक्तन्यायेनेतरर्योगद्वन्द्वोऽपि न स्यादिति वाच्यं, 'सामान्याऽप्रयोगे' इति लिङ्गात्प्रधानस्य सापेक्षत्वेऽपि तदभ्युपगमात् । उक्तं हि भाष्ये'भवति वै प्रधानस्य सापेक्षस्यापि वृत्तिः' इति। स्यादेतत्-समाहारद्वन्द्वस्याऽत्रप्राप्त्यभावे 'द्वन्द्वश्च प्राणितूर्ये 'ति नियमाऽप्रवृत्त्या इतरेतरयोगद्वन्द्वो निर्बाध एवेति सूत्रमिदमकिंचित्करमिति चेदत्राहुः- "नियमसूत्राणां निषेधमुखेन प्रवृत्ति'रिति पक्षे 'द्वन्द्वश्च प्राणितूर्ये 'ति सूत्रं केवलमितरेतरयोगद्वन्द्वनिषेधपरम्। तथा चेतरेतरयोगनिषेधस्य निषेधद्वारा इतरेतरयोगद्वन्द्वप्रापणार्थमिदमिति। एवं च निषेधमुखप्रवृत्तिपक्षस्य ज्ञापनायेदमिति फलितमिति दिक्। विभाषा समीपे। यद्यपीह 'समाहारद्वन्द्व एवे'ति व्याख्यानेऽपि न क्षतिस्तथापि पूर्वसूत्रे नियमनिषेधस्योक्तत्वात्तदनुरोधेनाह- नियमो वा स्यादिति। उपदशं दन्तोष्ठमिति। एकवद्भावपक्षेऽव्ययीभावस्यैवानुप्रयोगः। यदि तु बहुव्रीहिस्तदा 'उपदशस्य दन्तोष्ठस्ये 'ति षष्ठी स्याद्ध 'उपदशं दन्तोष्ठस्ये 'त्येवेष्यत इत्याकरः। 'दन्तोष्ठस्य दशन'मित्यभि प्रायेण षष्ठ्यां कृतायामपि उपदशशब्देन षष्ठी नेष्यते । अतो बहुव्रीहेर्नानुप्रयोगः, किं त्वव्ययीभावस्यैवेति तदाशयः।

आनङ्। 'ऋत' इति षष्ठ्यन्तं जातावेकवचनम्। 'ऋतो विद्यायोनिसंबन्धेभ्यः' इति त्वनुवर्तते, तच्चात्र षष्ठ्या विपरिणम्यते, तदाह- विद्यायोनिसंबन्धवाचिनामिति। ननु 'ऋतः' इत्यनुवर्तनादेव सिद्धे किमनेने ऋतो ग्रहणेन ? अत्राहुः- 'ऋतः' इति श्रूयमाणद्वन्द्वविशेषणम्। अनुवृत्तं तूत्तरपदे परतो यत्पूर्वं तस्य विशेषणं, पुत्रशब्दे पर आनङ् विधास्यते तत्र कार्यिनिर्देशार्थम्। अन्यथा तातपुत्रावित्यत्रापि स्यादिति। उत्तरपदे इति। एतच्च 'अलुगुत्तरपदे' इत्यधिकाराल्लभ्यते। उत्तरपदे परतः पूर्वं यदृदन्तं तस्याऽऽनङित्यर्थः। होतापोताराविति।

आनङो ङित्त्वात्पूर्वान्त्यस्य ऋकारस्याऽऽदेशे सति नलोपः। न चाऽऽकारमात्रमेव विधीयतीमिति वाच्यम्, 'उरएरपरः' इतिरपरप्रसङ्गात्, नन्विहोत्तरपदेन पूर्वपदं नाक्षिप्यते, अन्यथा 'होतृपोतृनेष्टोद्गातार' इत्यत्रमध्यमस्याऽऽनङ् न स्यात्। ततश्च विशेष्याऽसन्निधानादृत एव स्थाने आदेशेन भवितव्यं, न तु ऋदन्तपदस्य स्थाने इति किमनेनानङो ङित्करणेन ? सत्यम्। ङित्करणाऽभावे मित्रावरुणावित्यादौ 'देवताद्वन्द्वे चे'त्युत्तरपदे परे विधीयमानोऽयमादेशः पूर्वस्याक्षरस्य पदस्य वा स्यात्, पूर्वस्याऽल एवेत्यत्र नियामकाऽभावात्। एतेन 'ऋत इति कार्यिनिर्देशार्थ'मित्युक्तत्वानिर्दिश्यमानस्य ऋकारस्यैवादेशः स्यादिति ङित्करणं व्यर्थमित्याशङ्कापि परास्ता। नेष्टोद्गातार इति। न ह्यत्र नेष्टा पूर्वपदम्, आद्यवयवस्यैव पूर्वपदत्वात्। मातापितराविति। पुत्रोत्पादने अनयो?निकृतः संबन्धः, पूर्वत्र तु हौत्रादिरूपविद्याकृतः सम्बन्ध एकस्मिन्यज्ञे आर्विज्यरूप इति विवेकः। मण्डूकप्लुत्येति। तेन 'विभाषा स्वसृपत्यो 'रित्यत्र न संबध्यत इति भावः। पितापुत्राविति। अनयोरपि योनिकृतः सम्बन्धा जन्यजनकभावलक्षणः। देवता। अनुकारान्तार्थमविद्यायोनिसम्बन्धार्थं च वचनम् । ईदग्नेः। आनङोऽपवादोऽयम्। देवताद्वन्द्व इत्येवेति। इदं च वृत्तिग्रन्थे स्थितम्। ज्योतिर्लतयोरदेवताद्वन्द्वेऽपि 'अग्नीषोमौ प्रणेष्यागि' इत्याश्वलायनप्रयोगस्त्वार्षत्वात्साधुः। यद्वा मास्तु तदनुवृत्तिः, अग्निसोमौ माणवकावित्यत्र 'अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः' इति न्यायेनाऽदोषत्वात्। अग्नेः। 'सात्पदाद्यो'रिति निषेधेऽयमारम्भः। अग्निष्टुदिति। अग्निः स्तूयतेऽस्मिन् स क्रतुविशेषः। सम्पदादित्वादधिकरणे क्विप्। अग्निष्टोम इति। अग्नीनां स्तोमोऽग्निष्टोमः। सोमयागस्य संस्थास्वाद्या संस्थोच्यते। इद्वृद्धौ। तकार उच्चारणार्थः। इकारस्येकारविधानं तु बाधकबाधनार्थम्। वृद्धिशब्देनाऽत्र वृद्धिमदृह्यते,वृद्धिमात्रस्योत्तरपदस्याऽसंभवात्। अतो व्याचष्टे- वृद्धिमत्युत्तरपद इति। आनङमीत्वं च बाधित्वेति। यद्यपि वृद्धः प्रागेव आनङीत्वयोरन्तरङ्गत्वात्प्रवृत्तिरस्ति, तथापि 'परिहत्यापवादविषयमुत्सर्गोऽभिनिविशते' इति न्यायादानङीत्वे न भवत इति भावः। आग्नावैष्णवमिति। इत्वाऽभावादानव भवति। रुत्वं मा भूदिति। अकारे सति सकारस्य श्रवणं भवति, तेन. प्रयोग विकाराऽभावोऽनुमीयत इति भावः। विसर्गमिति। तथा च 'क्वचिद्विकारो ने'त्येवानुमेयं, लक्ष्यानुरोधादिति भावः। उषासासूर्यमिति। उषाश्च सूर्यश्च तयोः समाहारः। मातरपितरौ । मातृशब्दस्याऽरङादेशो निपात्यते। द्वन्द्वात्। अन्तग्रहणं विस्पष्टार्थं । चु इति वर्गग्रहणस्य प्रयोजनं ध्वनयतित्वक्त्रजमिति। बहूनां द्वन्द्वे तु वाक्त्वक्त्रजम्। द्वन्द्वगर्भे द्वन्द्वे तु वाक्त्वचस्रजम्। इति द्वन्द्वः ।

द्वन्द्वापवादत्वेनाह- अथैकशेष इति। विरूपाणामिति। रूप्यते बोध्यत इति व्युत्पत्त्या सौत्रस्य रूपशब्दस्याऽर्थपरयापि व्याख्यानात्सूत्राक्षरैरेव लब्धुं शक्यत इति प्रागेव व्याख्यातम्। वृद्धो यूना। 'अपत्यमन्तर्हितं वृद्ध'मिति पूर्वाचार्यैः परिभाषितस्य पाणिन्युक्तगोत्राऽपरपर्यायस्येह ग्रहणं, कृत्रिमेण यूना साहचर्यात् । तदाह- गोत्रं शिष्यत इति। 'गोत्रं यूना' इत्येव तु न सूत्रितम्, 'अपत्याधिकारादन्यत्र लौकिकं गोत्रग्रहण 'मिति सिद्धान्तात् । तेन औपगवश्चानन्तरः, औपगविश्च युवेत्यत्र नैकशेषः। भागवित्तीति। भगवित्तस्य गोत्रापत्यं भागवित्तिरित्यस्माथूनि 'वृद्धाक्सौवीरेषु बहुल 'मिति कुत्सायां ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते नतु युवत्वमात्रकृतं वैरूप्यम्। गार्यवात्स्यायनाविति। इह प्रकृत्यंशे वैरूप्यं, न गोत्रादिकृतम्। स्त्री पुंवश्च। वृद्धास्त्रीति। गोत्रप्रत्ययान्तं स्त्रीवाचकमित्यर्थः। पुंवद्भावकृलवैलक्षण्यं स्फुटीकर्तुंद्विवचनान्तेन विग्रहमाह-गायणाविति। अनुवर्तमान इति। 'तद्राजस्य बहुषु- 'इत्यतः। 'पुंव'दित्यर्थातिदेशस्य फलमनेन दर्शितम्। अन्यथा स्त्रीत्वस्याऽनिवर्तनाल्लुङ्न स्यात्। 'गर्गान्पश्ये 'त्यत्र नत्वं च सिद्धम्। रूपातिदेशे तु नैतत्सिद्धयेत्, सामान्यातिदेशे विशेषानतिदेशादित्याहुः। 'वृद्धो यूना' इत्याद्यनुवर्तनान्नेह-गार्गी चवात्स्यायनौ च।

पुमान्स्त्रिया। 'वृद्धो यूने 'ति निवृत्तम्, 'सरूपाणा'मिति त्वनुवर्तते, 'भ्रातृपुत्रौ' इत्युत्तरसूत्रारम्भात् । तेन 'हंसश्च वरटा चे'त्यत्र न भवति। अन्यथा स्यादेवाऽतिप्रसङ्गः। हंसत्वजातिसाम्येन शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वात्। स्यादेतत्-गौरियं, गौश्चायं, तयोः सहोक्तौ 'ए तौ गावौ' इति नियमतो न स्यात्, तल्लक्षणविशेषाऽभावात्। किं तु स्त्रीवाचकस्य पुंवाचकस्य वा 'सरूपाणा'मित्येकशेषोऽनियमेन स्यात् । अत्राहु.तदितरकृतविशेषाऽभावे तात्पर्यान्न दोष इति। 'इन्द्रेन्द्राण्यौ' इत्यादौ त्वेकशेषो न भवति, स्त्रीत्वपुंस्त्वेतरपुंयोगकृतविशेषस्य सद्भावात्। स्यादेतत्- 'एतौ गावौ' इति नियमतो न स्या 'दिति मनोरमादौ यदुक्तं, तत्कथं सङ्गच्छताम् ? 'त्यदादितः शेषे पुनपुंसकतः' इति नियमप्रवृत्त्या स्त्रीवाचिनो गोशब्दस्य शेषेऽपि 'एतौ गावौ' इति नियमतः प्रयोगः सिद्धयत्येवेति चेत् । अत्र केचित्-दिक्प्रदर्शनमात्रमिदम्। 'नीलौ गावौ' इति 'सुन्दरौ गावौ' इति नियमतो न स्यादित्युदाहर्तव्यम्। अथवा एतशब्दोऽत्राऽदन्तः कर्बुरवाची। एतश्च एता च एतौ गावौ, कर्बुरौ गावौ। 'सरूपाणा 'मित्यनेन स्त्रीलिङ्गशेषे तु 'एते गावौ' इत्यपि स्यादिति यथाश्रुतमेव समर्थनीयमित्याहुः। तदपरे न क्षमन्ते। 'त्यदादितःशेषे' इति नियमाऽप्रवृत्तावपि 'पुमान्स्त्रिया' इति नियमप्रवृत्त्या 'नीलौ गावौ' 'एतौगावौ' इति नियमतः सिद्धयत्येवेति। अत्र वदन्ति- 'अद्वन्द्वतत्पुरुषविशेषणाना 'मित्येतन्न्यायसिद्धमेव वचनम्।

'विशेष्ये यल्लिङ्गं तदेव विशेषणेष्वपी'तिसर्वसंमतत्वात्, एवं च द्वन्द्वतत्पुरुषविशेषणेष्विव एकशेषविशेषणेऽपि 'एतौ' इत्यत्र'त्यदादितः शेषे' इत्यादिनियमाऽप्रवृत्त्या विशेष्यगतमेव लिङ्गं भवतीतिस्त्रीवाचिगोशब्दस्य शेषे 'एते' इति स्यादेवेति 'एतौ गावौ' इति नियमतो नस्यादित्याक्षेपः सङ्गच्छत एवेति दिक्। नपुंसकमन। अन्यतरस्याङ्ग्रहणम् "एकवच्चे'त्यनेनैवानन्तर्यात्संबध्यते, न त्वेकशेषेणेत्याशयेनाह–क्लीबं शिष्यते तच्चवा एकवदिति। अनपुंसकेनेति किम् ? शुक्लं च शुक्लं च शुक्ले। अत्र 'एकवच्चे 'ति न भवति। 'अस्य' ग्रहणम् 'अस्यैवैकशेषस्य एकवद्भावो यथा विज्ञायते 'त्येवमर्थम्।

अन्यथा उत्तरत्राप्येकवदित्यस्यानुवृत्तिः शङ्कयेत। शुक्लः पट इत्यादि। 'शुक्लः शुक्ला शुक्ल 'मित्येव विग्रहः, 'पटः पटी'त्यादिप्रदर्शनं तु शुक्ल शब्दस्य गुणिलिङ्गत्वस्फोरणाय। पिता मात्रा। श्वशुरः श्वश्र्वा। नन्वेतत्सूत्रद्वयं व्यर्थं, पितृशब्देन मातापित्रोः श्वशुरशब्देन श्वश्रूश्वशुरयोर्लक्षणया बोधसंभवात्। न च 'सरूपाणा'मित्यादिसूत्रसमूहवदिदमपि सूत्रद्वयं द्वन्द्वनिवृत्त्यर्थमावश्यकमिति वाच्यं, पक्षे तस्यापीष्टत्वादिति चेत्। अत्राहुः– पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः केवलयोरुक्तविषये प्रयोगं वारयितुमारम्भणीयणेव सूत्रद्वयम्, अनभिधानमाश्रित्य प्रत्याख्यानस्याऽनुचितत्वादिति। मातापिराविति। 'पितुर्दशगुणं माता गौरवेणातिरिच्यते'इति स्मृतेर्मातुरभ्यर्हितत्वात्पूर्वनिपातः। 'आनकृतः' इत्यानङ्। श्वश्रूश्वशुराविति।

'श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता' इति स्मृतेः श्वश्र्वा अभ्यर्हितत्वापूर्वनिपातः। त्यदादीनि सर्वैः। सर्वैः किम् ? त्यदादिभिन्नैरपि सहोक्तौ यथा स्यात्, प्रत्यासत्त्या 'त्यदादिभिरेव सहोक्तौ' इत्यर्थो मा भूत्। यत्परमिति। शब्दपरविप्रतिषेधादिति भावः। त्यदादिति इति। आद्यादित्वात्तसिः। 'त्यदादीनां (स्त्री) शेषे सह विवक्षितेषु यः पुमान्, यच्च नपुंसकं, तद्वशेन लिङ्गप्रतिपादकानि भवन्तीति वाच्य 'मित्यर्थः। कानीत्याकाङ्क्षायामर्थात्त्यदादीन्येव। अस्यापवादमाह– अद्वन्द्वेति। द्वन्द्वादिविशेषणानां पूर्वोक्तं न, किं तु विशेष्यनिघ्नतैवेत्यर्थः। नन्वेवं 'कुक्कुटमयूर्यो' इत्यत्र उभयपदार्थप्रधानत्वेन उभयोरपि विशेष्यत्वाद्विशेष्यनिघ्नतायामपि 'कुक्कुटमयूर्याविमे' इति नियमतो न स्यादिति चेदत्र नव्याः– 'परवल्लिङ्ग'मित्यनेन द्वन्द्व तत्पुरुषयोरुत्तरपद–लिङ्गवत्त्वादुत्तरपदलिङ्गस्यैव द्वन्द्वतत्पुरुषप्रतिपाद्यत्वेन तल्लिङ्गाधीनतैवाऽनुप्रयोगस्येति न काचिदनुपपत्तिरिति । मयूरीकुक्कुटाविमाविति।

लघुशब्देन्दुशेखरे नागेशभट्टः चार्थे द्वन्द्वः इति सूत्रस्य अर्थविवेचन प्रसङ्गे सिद्धान्तकौमुद्यां प्रयुक्तम् अनेकं प्रथमान्तं पदं इत्यस्य व्याख्यां कुर्वन्नाहचार्थे। 'अनेकमन्य' इत्यतोऽनेकमित्यनुवर्तते। तत्फलं 'स्रग्वाग्दृषदं' 'होतृपोतृनेष्टोद्गातारः' इत्यादौ यथायथं समासान्ताऽऽनङोर्मध्ये प्रवृत्तिर्न, अन्ते एव च तत् प्रवृत्तिः। अत्र वदन्ति– द्वन्द्वः प्रथमान्तानामेव न परिनिष्ठितविभक्तयन्तानाम्।

'चैत्रेण मैत्रण च कृत'मिति वाक्येऽवयवकर्तृत्वस्यैव प्रतीतेः, 'चैत्रमैत्राभ्यां कृत 'मिति समासे समुदायकर्तृत्वस्यैव प्रतीतेः, तस्य वाक्यस्य समाससमानार्थत्वाऽभावेन तस्य तद्वाक्यत्वाऽभावात्। अत एव 'यदग्नये च प्रजापतये च' इत्यादौ व्यस्ते प्रत्येकंदेवतात्वप्रतीतिः, 'अग्नीषोमाभ्याम्' इत्यादी समुदाये देवतात्वप्रतीतिरिति व्यवस्था सिद्ध्यति । तस्यापि तद्वाक्यत्वे तु समास इव तत्रापि समुदाये देवतात्वप्रतीतिरिव स्यात् । अत एव 'न ङिसम्बुद्ध्योः' इति सूत्रे भाष्ये– 'न ङिसबुद्ध्योरनुत्तरपदे' इति वार्त्तिके संबुद्धिग्रहणं न कार्यम्, राजवृन्दारकेत्यादौ संबुद्ध्यन्तानां न समासः। इह तावत्समाससमानार्थकेन वाक्येन भवितव्यम्, समासेन च। यश्चेहार्थो वाक्येन गम्यते नासौ जातु चित्समासेन गम्यते; अवयवसंबोधनं वाक्येन गम्यते, समुदायसंबोधनं समासेन' इत्युक्तम्। संबोधनविभक्त्यन्तस्याभिमुखीभावफलकत्वेन प्रत्येकमेवाभिमुखीभावप्रतीत्या क्रियान्वयेन परस्परमसामर्थ्यमिति तद्भावः। यदा समानाधिकरणस्थलेऽपि समासो न, तदा व्यधिकरणानां द्वन्द्वः सुतरां नेति परिनिष्ठितविभक्त्या समासेऽपि राजपुरोहिताविति न तदुदाहरणम्। एवञ्च व्यधिकरणतृतीयाद्यन्तानामपि क्रियादावेवान्वयेन क्रियाजनकत्वरूपकारकत्वस्य प्रत्येकमेव बोधेन वाक्यसमासयोर्न समानार्थत्वम्। एतेन 'कटं भीष्मम्' इत्यादौ प्रत्येकं कर्मतयोभयोः क्रियान्वयेऽपि पार्णिकपरस्परान्वयेन सामर्थ्यमादाय समास इति मीमांसकनव्योक्तमपास्तम्। राजवृन्दारकेत्यादावपि पार्णिकान्वयेन सामर्थ्यमादाय समासापत्तौ भाष्याऽसङ्गतेः। 'तिङ्समानाधिकरणे प्रथमा' 'अभिहिते प्रथमा' इति न्यासेऽपि

समुदायद्वाराऽवयवानामपि तिङ्सामानाधिकरण्येन समुदायकर्तृत्वोक्तावयवकर्तृत्वस्याप्यभिहितत्वेन समुदायप्राधान्येऽप्यवयवेभ्यः प्रथमा भवत्येव। अत एव तत्र चैत्रो मैत्रश्च गच्छतः, तौ पचत इत्यादि नित्यद्विवचनाद्यन्ताक्ष्यातप्रयोग एवेति दिक् ।

परस्परनिरपेक्षस्येति। तत्त्वं चैकस्य क्रियान्वयोत्तरमपरस्याऽऽवृत्त्या तदन्वयात् । अनेकस्येति। तेनैकस्य सापेक्षत्वेऽपि न दोष इति भावः। समुच्चये चशब्देन समभिव्याहतपदार्थे इतरसापेक्षत्वं बुद्ध्यते, तदसमभिव्याहते तु न। अत एवात्रैकचशब्दप्रयोग एव। एकस्मिन्निति।

एकधर्मावच्छिन्ने इत्यर्थः। अन्वय इति। यत्रैवमन्वयस्तत्र समुच्चयश्चशब्दार्थ न्वयः, न त्वन्वय एव समुच्चय इति भ्रमितव्यम्। अन्वयो विशेष्यतया, विशेषणतया वा। तत्राऽन्त्यो वक्ष्यमाणोदाहरणे। आद्यस्तु 'देवदत्तः पचति हसति चे'त्यादौ क्रियासमुच्चये। आनुषङ्गिकत्वमनुद्देश्यत्वम्। अन्यस्य प्राधान्यञ्च तत्संबन्धिक्रियाया कर्त्तव्यत्त्वरूपम्। अन्वाचये आनुषङ्गिकत्वं व्याप्यत्वं च समभिव्याहृतक्रियागतञ्चाऽर्थः। मिलितानामिति। परस्परापेक्षाणामुद्भूतावयवभेदसमूहरूपाणामित्यर्थः। अन्वय इति। एकधर्मावच्छिन्नेनाऽन्वय इत्यर्थः। तेन नीधातोः संयोगजनकव्यापारानुकूलव्यापारवाचकतया द्विकर्मत्वेऽपि 'अजां ग्रामं नयति' इत्यादी न चकारप्रयोगो, नापि सभासः, एकधर्मावच्छिन्नेऽन्वयाऽभावात्। अत एवात्राऽनेकचकारप्रयोगः। यत्रैवमन्वयस्तोतरेतरयोगस्तादृशसमूहश्चार्थ इत्यन्वयः। समूहे उद्भूतावयवभेदत्वञ्चावयवगतसंख्यारोपवत्त्वं, प्रत्यवयवं समूहरूपत्वारोपो वा। समूह इति। अनुभृतावयवभेदः समूह इत्यर्थः। तत्रेतरेतरयोगे उद्भूतावयव समूहस्य प्रतीत्या प्रत्येकवृत्तिधर्मरूपमेव प्रवृत्तिनिमित्तम्। समाहारे त्वतिरिक्तत्वेनैव समूहस्य भानात्समूहत्वं प्रवृत्तिनिमित्तमिति विशेषः। असामर्थ्यादिति। अनेकसुबन्तानां चार्थे वृत्त्यभावेनैकार्थीभावरूपसार्थ्याऽभावात्। किं च तत्र चार्थश्च भिव्याहते विशेषणम्, समासस्त्वन्यपदार्थप्राधान्ये इव चार्थप्राधान्ये एव। स्पष्टचेदं सर्वमत्र सूत्रे भाष्ये। तत्रहि- 'चार्थस्याऽसत्त्वभूतत्वात्तदर्थसमासस्याप्यलिङ्गाऽसंख्यता प्राप्नोति' इत्याशङ्कय स्वभावेन परिहतम् । गुणवचनवद्यद्रव्याश्रितः समासार्थस्तद्र्व्यलिङ्गसङ्ख्याग्राहक इति च समाहितम्। अतो नेदं भाष्यं समाहारविषयम्, तस्य समूहद्रव्यलिङ्गादिग्राहित्वाऽभावात्। नन्वेवं 'परवत्' इति सूत्रस्थस्य 'अवयवावेवापेक्षितपरस्परौ द्वन्द्वाऽर्थौ न तु तद्व्यतिरिक्तः समुदायोऽस्ति' इति कैयटग्रन्थस्याऽसङ्गतिरिति चेत्। न, तस्यात्यन्तव्यतिरेक्तो नेत्यर्थात् । अपेक्षितपरस्परावित्यनेन च समूहरूपता उद्भूतावयवभेदता च दर्शिता। अत एव यद्वाऽवयवव्यतिरिक्तः समुदायोऽर्थः, स चावयवलिङ्गेन लिङ्गवान्' इति तदुक्त पक्षान्तराद्वोधाऽविशेष इत्यन्यत्र निरूपितम्। 'अहरहर्नयमानो गामश्वं पुरुषं पशुद'मित्यादौ न समासः। अहरहःपदेन विनिगमनाविरहात् परस्परसाहित्यावगतावपि तस्य चकाराऽवाच्यत्वात्। यत्र विग्रहे चैतदेव द्योत्यं साहित्यं तत्रैव समासो नान्यत्रेति स्पष्टं भाष्ये। चार्थबलादेव सति तात्पर्ये समभिव्याहृतक्रियायामेककालिकत्वादि गम्यते इति दिक्। 'प्राच्यभरतेषु' इति निर्देशात्सामान्यशब्दस्योपात्तविशेषातिरिक्त परत्व सहविवक्षासंभवेन द्वन्द्वो भवत्येव । तेन 'गोबलीवर्दमित्यादिसिद्धिः। राजदन्तादिषु। इदं सर्वसमासविषयम्, षष्ठीसमासकर्मधारयद्वन्द्वानां तत्र पाठात्। धर्मादिष्विति। द्वन्द एवेदम् । राजदन्ताद्यन्तर्गणसूत्रमेतत् । जम्पतीति। अभ्यर्हितत्वात्पत्युः पूर्वनिपातः प्राप्तः। निपात्यत इति। राजदन्तादिगणे पाठेनेति भावः। अयं राजदन्तादिरित्यर्थः। अल्पान्तरम्। यथाकथंचिदतिशयमारोप्य 'गरीयांसम्' इत्यादिभाष्यप्रयोगे ईयसुनिव इह तरप्। अत एव 'अतन्त्रं तरनिर्देशः' इति भाष्यं सङ्गच्छते। 'उच्चस्तराम्' इति सूत्रे चभाष्ये स्पष्टमिदम्। तत्प्रयोगश्चाऽदृष्टार्थः। अत एव 'स्वरितात्संहितायामनुदात्तानाम्' इति सूत्रेऽनुदात्तानामित्यत्र शब्दसंस्कारार्थमेव बहुत्वं विवक्ष्यते न तु तत्कार्यान्वयीति कैयटः। मृदङ्गशङ्खतूणवाः' इत्यादौ द्वन्द्वोत्तरपदो द्वन्द्व इति बोद्ध्यम्। 'तन्त्रं तरनिर्देशः'इति भाष्योक्तपक्षान्तरे मुख्योऽतिशयोऽर्थ इत्यर्थः, तदाऽपि प्रकृतसूत्रेऽतिशय एव विवक्षितो न तु द्वयोरित्यंशः। तेन 'शङ्खदुन्दुभिवीणानाम्' इति बहुष्वपि सिद्ध्यति । 'यदेतदल्पान्तरमिति, तदल्पाजिति वक्ष्यामि' इति भाष्यस्य यतः कुतश्चित्सर्वस्याप्यल्पाच्वात्सामर्थ्यादतिशयार्थे भविष्यतीत्यर्थः। अत्र पक्षेऽल्पाच्वंयत्किंचिदपेक्षया, अतिशयस्तूपात्ताऽपेक्षया। अतन्त्रपक्षे तु अतिशयः सर्वथाऽविवक्षित एव, अल्पाच्वञ्चोपात्तापेक्षयैवेति स्पष्टं भाष्ये। तन्त्रपक्षेऽपिद्वयोरित्यंशाऽविवक्षणादतन्त्रपक्षस्यैव ज्यायस्त्वमत्र। अस्याऽत्यन्तरस्वार्थिकतरब्ज्ञापकत्वमिति तु न युक्तम्। तन्त्राऽतन्त्रविचारस्य भाष्येऽसङ्गत्यापत्तेः। न हिसर्वथाऽर्थाभावे एवं विचारः संभवति। मम तु आरोपितत्वेऽतन्त्रत्वं, मुख्यत्वे तन्त्रत्वमिति तत्सङ्गतिः। कुत्वचुत्वयोरभावश्च निपातनात्। अत्रापि बहुष्वनियमः।

आनुपूघेणेति। ऋतूनामानुपूर्ये-प्रादुर्भावकृतम्, नक्षत्राणान्तूदयकृतं बोद्ध्यम्। अनित्यमिदं प्रकरणम्, 'लक्षणहेत्वोः' इति । निर्देशात्। घ्यन्तादिति।अजाद्यदन्ताच्चाल्पान्तरं लघ्वक्षरम् ऋतुनक्षत्राणामिति अभ्यहितञ्चेति भ्रातुायस इतिच विप्रतिषेधेन। सर्वतोऽप्यभ्यहितं पूर्वम्। 'वासुदेवार्जुनाभ्याम्' इति निर्देशात् । द्वन्द्वश्च। अत्र तूर्याङ्गशब्देन वादका एवेति 'अल्पान्तरम्' इत्यत्र भाष्ये ध्वनितम् ।अङ्गशब्द आद्यन्तयोरवयवपरः, मध्ये तूपकारकपरः। अङ्गशब्दस्य च प्रत्येकमन्वयः,तत्रैकप्राण्याद्यङ्गकद्वन्द्वाऽसंभवेनान्यग्रहणस्यावश्यकत्वे प्रत्यासत्त्या तत्तद्वाक्योपस्थितप्राण्यङ्गाद्येव द्वितीयं गृह्यते। तेन 'मार्दङ्गिकाश्वारोहौ' इति सिद्धम्। एवगेव 'अध्वर्युक्रतुः' इत्यादौ बोद्ध्यम्। एकवचनशब्दश्च योगेनैकत्वविशिष्टबोधकपरः, तदाह- एकवदिति। एकार्थबोधकपदवदित्यर्थः। पाणिपादमिति। प्राण्यङ्गत्वेन प्राणित्वात् 'जातिरप्राणिनाम्' इत्यनेन न सिद्धिः। नियमार्थमिति। एतच्च 'विभाषा वृक्षे 'ति सूत्रे भाष्यकैयटयोः स्पष्टम्। न

चैतानि इतरेतरयोग एकवद्भावविधानार्थानि कुतो न भवन्ति, 'पाणिपाद:' इति च तत्फलमिति वाच्यम्। द्विगुरेकवचनम् इति साहचर्येण, व्याख्यानेन चानुवादत्वस्यैवौचित्येनाऽत्रत्यद्वन्द्वपदस्य समाहारद्वन्द्व परत्वात् । तत्र तदनुवादेनैकत्वविधाने फलाऽभावात्। प्राण्यङ्गाद्यनुवादेन एकवचनद्वन्द्वविधयो नियमा: – "एतेषां समाहार एवेति। तदाह– समाहार एवेति। ध्वनितं चेदं 'बिशिष्टलिङ्ग' इत्यादौ 'समाहारे द्वन्द्व: स्या'दिति व्याख्यानेन। 'द्विगुरेके 'ति सूत्रेऽनुवाद फलन्तु तत्रैवोक्तम्। विपरीतनियमाऽभावबीजं 'तिष्यपुनर्वस्वो:' इति सूत्रे उक्तम्। अनुवादे यदा प्रतिपत्रा प्रमाणान्तरावगतमप्यर्थे कार्यान्तरार्थे प्रयोगक्त्रा प्रतिपाद्यते तदाऽनुवाद:, तदाह– सिद्धस्येति। प्रकृते चोदयप्रतिष्ठयोरनुवाद:। असिद्धज्ञापने तुउदगु: कठकालापा इत्यपि चरणशब्दोऽत्र शाखाध्येतृपर:। स्थेणोरिति। लुङन्तस्थेणो: प्रयोगे सतीत्यर्थ:। अध्वर्युक्रतुरिति। षष्ठ्यर्थे इयं प्रथमा। अविप्रकृष्टेति च्छेदस्तदाहप्रत्यसन्ना इति। अध्ययनगता प्रत्यासत्तिरध्येये, तद्द्वारा तदध्येतरि चारोप्यत इति भाव:। पदक्रमशब्दयोस्तु जातित्वादेव सिद्धमिति तदध्येतृपुरुषवाचकेऽस्य प्रवृत्ति:। जातिर। षष्ठ्यर्थे प्रथमा, तदाह– जातिवाचिनामिति। यद्यपि–क्षतप्रोहणादिना वृक्षादीनामपिप्राणित्वं, तथापीह लोकप्रसिद्धमनुष्यादय एव प्राणिशब्देन गृह्यन्ते इति 'विभाषा वृक्षे 'ति सूत्रस्थभाष्यस्वरस:। जाति: किम् ?, नन्दकपाञ्चजन्यौ। हरे: खड्गो नन्दक:, शङ्खश्च पाञ्चजन्य:। एकव्यक्तिवृत्तित्वान्न जाति:। द्रव्येति। 'अप्राणिना मिति पर्युदासादेतल्लभ्यते। जातिप्राधान्येति। प्राधान्यञ्च तज्जात्याश्रयसकलव्यक्तिबोधनरूपम्। द्रव्यविशेषेत्यस्य नियतद्रव्यविशेषेत्यर्थ:। इदञ्च 'तस्यादित' इतयत्र कैयटे। यद्वा प्राधान्यं नाम विशेष्यत्वम्। तदा द्रव्यं विशेषणं, वाहाद्यन्वय: परम्परया जातौ। तत्र तात्पर्यग्राहकमेकवचनम्। द्रव्यप्राधान्ये त्वितरेतरयोगोऽपीति बोध्यम्। 'क्षीरोदके सम्पृक्ते' इति 'अन्तादिवच्चे 'ति सूत्रे भाष्यप्रयोगोऽत्र मानम्। बदरामलकानीति। फलत्वव्याप्यजातिवचनावेतौ। विशिष्टलिङ्गो। अग्रामा इति पर्युदास:। ग्रामभिन्नसर्वावयवग्रहणमत्र । इह ग्रामपदेन 'ग्रामे नाध्येयम्' 'उदीच्यग्रामाच्च' इत्यादाविव नगरं न गृह्यते, व्याख्यानात्। तेन मथुरापाटलिपुत्रमित्येव। अत्र नदीदेशविषये द्वे वाक्ये। तत्र 'द्वन्द्वश्च' इति सूत्रोक्तरीत्या नद्यादिसर्वावयवग्रहणम् । अतो 'गङ्गापाटलिपुत्रे' इत्यादौ न। तदाह– ग्रामवर्जेति। नदीग्रहणेन नदस्यापि ग्रहणम् । अत एव तत्र भिन्नलिङ्गत्वसम्भव:। येषांच। शश्वच्छब्दस्त्रैकाल्ये, ततो भवार्थे निपातनाट्टबि टिलोपकादेशयोरभाव:। अस्य सन्धिवेलादिषु पाठाच्छाश्वतमपि। स्वाभाविक इत्यर्थ:। परत्वादिति। पशुकुनिद्वन्द्वावकाशो–गोमहिषहंसचक्रवाकादि:। अस्यावकाशो–अहि नकुलादि:। अत्र विरोधो = वैरं, न तु सहानवस्थिति:। तेन छायातपाविति सिद्धम्। पात्रादिति। यैर्भुक्ते स्मृत्युक्तसंस्कारेण पात्रं न शुद्ध्यति ते = निरवसिता इत्यर्थ:। यथोच्चारितानीति। गणपाठे रूपमेषां विवक्षितं, न तु पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यम्।

तेन (पररूपादिपक्षे ?) पूर्वरूपपक्षे 'गोऽश्वम्' गोऽश्वा:' इति । 'दासीदासम्' इत्यत्राऽत एव निपातनात् 'पुमान्स्त्रिये 'त्येकशेषो न। गवाश्वे पशुद्वन्द्वविभाषा प्राप्ता, केषाश्चिदबहुप्रकृत्यर्थ: पाठ:, केषांचित्सामान्यत: प्राप्ते नियमार्थ:। वृक्षादौ विशेषाणामेवेति। 'स्वं रूपम्' इति सूत्रे भाष्ये तथोक्तेरिति भाव:। आदिना मृगादिषट्कम्। प्रागुक्तरीत्या मृगादिसर्वावयवकसमुदाये एवैतद्बोधिततत्तद्वाक्यप्रवृत्ति: । व्रीहिकुशप्लक्षमित्यादौ तु जातित्वान्नित्यमेव। फलसेनेति। बहुप्रकृति: = बहुवचनान्तावयवक इत्यर्थ:। अत्र वनस्पतिशब्देन वृक्षग्रहणम्। सेनाशब्देन तदङ्गम् । इदं प्रकरणशेषभूतम्। एष्वेकवचनद्वन्द्वविषयं यद्यच्छास्त्रं प्राप्नोति तद्बहुवचनान्तावयवकसमुदायस्यैव। तेनाऽबहुप्रकृतेरितरेतरयोग एव। एतेन 'संग्राम हस्त्यश्वरथपदातिभि:' इति 'येन विधि:' इतिसूत्रस्थभाष्यप्रयोग: 'पातितै रथनागाश्वै:' इति चोपपन्नम्, तदाह– जातिरिति। सेनाङ्गत्वान्नित्यं प्राप्ते इति। 'विकल्पार्थमित्यनुषज्यते। गोमहिषमित्याद्युदाहरणन्तु प्राप्तिमात्राभिप्रायेण, 'चार्थे द्वन्द्व:' इत्येव सिद्धे:।

यद्यपि सर्वोद्वन्द्व: विभाषया एकवद्भवति इति नियमानुसारं घटपटौ, घटपटम्इति उभं साधु:। परञ्च क्वचित् समाहारद्वन्द्वेव ईप्सित: न इतरेतरयोग:। तथाहि पूर्ण द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामित्यादि।

एवमेव क्वचित् विकल्पेन समाहारद्वन्द्वो भवति। यथा – सूत्रम् – विभाषा वृक्षमृग धान्य पशु शकुन्यश्ववडवापूर्वापराधरोत्तरम् । अत्र विकल्पेन समाहार द्वन्द्वो भवति ।

द्वन्द्वसमासस्य एक: अन्योऽपि भेद: एकशेष:। बहुषु एकस्य अवस्थानम् एकशेष: कथ्यते। क्वचित् स्वरूपाणां शब्दानां एकशेष: यथा – सूत्रम् – सरूपाणामेकशेष एकविभक्तौ इति। रामश्च रामश्च रामश्च रामा:। क्वचित् समानार्थानां विरूपाणामपि एकशेष: यथा – घट: च कलशश्च इति घटकलशौ। वक्रदण्ड: च कुटिलदण्ड: च इति वक्रदण्डौ कुटिलदण्डौ वा।

'पुमान् स्त्रिया' इति सूत्रेण स्त्रीपुंस्सयो: पदयो एकशेषे पुमान् शब्द एव शिष्यते। यथा – हंस: च हंसी च इति हंसौ । एवं पुत्र: च दुहिता च इति पुत्रौ । भ्राता च स्वसा च इति भ्रातरौ।

"पिता मात्रा' इति सूत्रेण समासे पितृशब्द एव विकल्पेन शिष्यते । यथा – माता च पिता च इति पितरौ मातापितरौ वा।
'श्वशुरः श्वश्वा' इति सूत्रेण समासे कृते श्वशुरः शब्दः विकल्पेन शिष्यते । यथा – श्वशुरः च श्वश्रूः च धुशुरौ श्वश्रू श्वशुरौ वा।।
अतः लघुश्ब्देन्दुशेखेर समाहारद्वन्द्वसमासे एकशेष समासे च इत्थं व्याख्यातम् । द्वन्द्वश्च। अत्र तूर्याङ्गशब्देन वादका एवेति 'अल्पान्तरम्' इत्यत्र भाष्ये ध्वनितम् । अङ्गशब्द आद्यन्तयोरवयवपरः, मध्ये तूपकारकपरः। अङ्गशब्दस्य च प्रत्येकमन्त्रयः तत्रैकप्राण्याद्यङ्गकद्वन्द्वाऽसंभवेनान्यग्रहणस्यावश्यकत्वेप्रत्यासत्त्या तत्तद्वाक्योपस्थितप्राण्यङ्गाद्येव द्वितीयं गृह्यते। तेन 'मार्दङ्गिकाश्वारोहौ' इति सिद्धम्। एवगेव 'अध्वर्युक्रतुः' इत्यादौ बोद्ध्यम्। एकवचनशब्दश्चयोगेनैकत्वविशिष्टबोधकपरः, तदाह– एकवदिति। एकार्थबोधकपदवदित्यर्थः।

पाणिपादमिति। प्राण्यङ्गत्वेन प्राणित्वात् 'जातिरप्राणिनाम्' इत्यनेन न सिद्धिः।नियमार्थमिति। एतच्च 'विभाषा वृक्षेति सूत्रे भाष्यकैयटयोः स्पष्टम्। न चैतानिइतरेतरयोग एकवद्भावविधानार्थानि कुतो न भवन्ति, 'पाणिपादः' इति च तत्फलमिति वाच्यम्। द्विगुरेकवचनम् इति साहचर्येण, व्याख्यानेन चानुवादत्वस्यैवौचित्येनाऽत्रत्यद्वन्द्वपदस्य समाहारद्वन्द्व परत्वात्। तत्र तदनुवादेनैकत्वविधाने फलाऽभावात्।

प्राण्यङ्गाद्यनुवादेन एकवचनद्वन्द्वविधयो नियमार्थाः– 'एतेषां समाहार एवेति। तदाहसमाहार एवेति। ध्वनितं चेदं 'बिशिष्टलिङ्ग' इत्यादौ 'समाहारे द्वन्द्वः स्या'दिति व्याख्यानेन। 'द्विगुरेके 'ति सूत्रेऽनुवाद फलन्तु तत्रैवोक्तम्। विपरीतनियमाऽभावबीजं 'तिष्यपुनर्वस्वोः' इति सूत्रे उक्तम्। अनुवादे यदा प्रतिपत्रा प्रमाणान्तरावगतमप्यर्थे कार्यान्तरार्थे प्रयोगक्त्रा प्रतिपाद्यते तदाऽनुवादः, तदाह– सिद्धस्येति। प्रकृते चोदयप्रतिष्ठयोरनुवादः। असिद्धज्ञापने तु–उदगुः कठकालापा इत्यपि चरणशब्दोऽत्र शाखाध्येतृपरः। स्थेणोरिति। लुङन्तस्थेणोः प्रयोगे सतीत्यर्थः। अध्वर्युक्रतुरिति। षष्ठ्यर्थे इयं प्रथमा। अविप्रकृष्टेति च्छेदस्तदाह– प्रत्यसन्ना इति। अध्ययनगता प्रत्यासत्तिरध्येये, तद्द्वारा तदध्येतरि चारोप्यत इति भावः। पदक्रमशब्दयोस्तु जातित्वादेव सिद्धमिति तदध्येतृपुरुषवाचकेऽस्य प्रवृत्तिः। जातिर। षष्ठ्यर्थे प्रथमा, तदाह– जातिवाचिनामिति। यद्यपि–क्षतप्रोहणादिना वृक्षादीनामपि प्राणित्वं, तथापीह लोकप्रसिद्धमनुष्यादय एव प्राणिशब्देन गृह्यन्ते इति 'विभाषा वृक्षे 'ति सूत्रस्थभाष्यस्वरसः। जातिः किम् ?, नन्दकपाञ्चजन्यौ। हरेः खङ्गो नन्दकः, शङ्खश्च पाञ्चजन्यः। एकव्यक्तिवृत्तित्वान्न जातिः। द्रव्येति। 'अप्राणिना 'मितिपर्युदासादेतल्लभ्यते। जातिप्राधान्येति। प्राधान्यञ्च तज्जात्याश्रयसकलव्यक्तिबोधनरूपम्। द्रव्यविशेषेत्यस्य नियतद्रव्यविशेषेत्यर्थः। इदञ्च 'तस्यादित' इतयत्र कैयटे। यद्वा प्राधान्यं नाम विशेष्यत्वम्। तदा द्रव्यं विशेषणं, वाहाद्यन्वयः परम्परया जातौ। तत्र तात्पर्यग्राहकमेकवचनम्। द्रव्यप्राधान्ये त्वितरेतरयोगोऽपीति बोध्यम्। 'क्षीरोदके सम्पृक्ते' इति 'अन्तादिवच्चे 'ति सूत्रे भाष्यप्रयोगोऽत्र मानम्। बदरामलकानीति। फलत्वव्याप्यजातिवचनावेतौ। विशिष्टलिङ्गो। अग्रामा इति पर्युदासः। ग्रामभिन्नसर्वावयवग्रहणमत्र। इह ग्रामपदेन 'ग्रामे नाध्येयम्' 'उदीच्यग्रामाञ्च' इत्यादाविव नगरं न गृह्यते, व्याख्यानात्। तेन मथुरापाटलिपुत्रमित्येव। अत्र नदीदेशविषये द्वे वाक्ये। तत्र 'द्वन्द्वश्च' इति सूत्रोक्तरीत्या नद्यादिसर्वावयवग्रहणम्। अतो 'गङ्गापाटलिपुत्रे' इत्यादौ न। तदाह– ग्रामवर्जेति। नदीग्रहणेन नदस्यापि ग्रहणम्। अत एव तत्र भिन्नलिङ्गत्वसम्भवः। येषांच। शश्वच्छब्दस्त्रैकाल्ये, ततो भवार्थे निपातनाटुजि टिलोपकादेशयोरभावः। अस्य सन्धिवेलादिषु पाठाच्छाश्वतमपि। स्वाभाविक इत्यर्थः। परत्वादिति। पशुकुनिद्वन्द्वावकाशो–गोमहिषहंसचक्रवाकादिः। अस्यावकाशो–अहि नकुलादिः। अत्र विरोधो = वैरं, न तु सहानवस्थितिः। तेन छायातपाविति सिद्धम्। पात्रादिति। यैर्भुक्ते स्मृत्युक्तसंस्कारेण पात्रं न शुद्ध्यति ते = निरवसिता इत्यर्थः। यथोच्चारितानीति। गणपाठे रूपमेषां विवक्षितं, न तु पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यम्। तेन (पररूपादिपक्षे ?) पूर्वरूपपक्षे 'गोऽश्वम्' गोऽश्वाः' इति । 'दासीदासम्' इत्यत्राऽत एव निपातनात् 'पुमान्स्त्रिये'त्येकशेषो न। गवाश्वे पशुद्वन्द्वविभाषा प्राप्ता, केषाश्चिदबहुप्रकृत्यर्थः पाठः, केषांचित्सामान्यतः प्राप्ते नियमार्थः। वृक्षादौविशेषाणामेवेति। 'स्वं रूपम्' इति सूत्रे भाष्ये तथोक्तेरिति भावः। आदिना मृगादिषट्कम्। प्रागुक्तरीत्या मृगादिसर्वावयवकसमुदाये एवैतद्बोधिततत्तद्वाक्यप्रवृत्तिः। व्रीहिकुशप्लक्षमित्यादौ तु जातित्वान्नित्यमेव। फलसेनेति। बहुप्रकृतिः = बहुवचनान्तावयवक इत्यर्थः। अत्र वनस्पतिशब्देन वृक्षग्रहणम्। सेनाशब्देन तदङ्गम्। इदं प्रकरणशेषभूतम्। एष्वेकवचनद्वन्द्वविषयं यद्यच्छास्त्रं प्राप्नोति तद्बहुवचनान्तावयवकसमुदायस्यैव। तेनाऽबहुप्रकृतेरितरेतरयोग एव। एतेन 'संग्राम हस्त्यश्वरथपदातिभिः' इति 'येन विधिः' इतिसूत्रस्थभाष्यप्रयोगः 'पातितै रथनागाश्वैः' इति चोपपन्नम्, तदाह– जातिरिति। सेनाङ्गत्वान्नित्यं प्राप्ते इति। 'विकल्पार्थमित्यनुषज्यते। गोमहिषमित्याधुदाहरणन्तु प्राप्तिमात्राभिप्रायेण, 'चार्थे द्वन्द्वः' इत्येव सिद्धेः। परे तु फलसेनेति वार्त्तिकव्याख्यानभाष्ये 'एषां द्वन्द्वो विभाषैकवद्भवति बहुप्रकृतिः' इति

व्याख्यानाद्बहुप्रकृतिकद्वन्द्वस्य वैकल्पिककैवत्त्वं फलादिविषयेऽपि । अत एव बदरामलकं बदरामलकानीत्युदाहृतं भाष्ये। एवं चोक्तप्रयोगाः सर्वथा निर्बाधा एव। अत एवैतद्वचनं विभाषापदानुवृत्तयेऽत्र पठितं न तु 'द्वन्द्वश्च' इति सूत्रे इत्याहुः। नन्वेवं मृगशकुनिग्रहणं व्यर्थे, 'चार्थे ' इत्यनेनैव सिद्धरत आह- मृगाणां मृगैरेवेति। 'तेषान्तैरेवैकवचनो द्वन्द्वः, नान्यः, स च विभाषे 'ति नियम इति भावः, तदाहअन्यैस्त्विति। एवमिति। पूर्वापरशब्दयोरधरोत्तरयोः परस्परमेव समाहारद्वन्द्वोऽन्यैस्त्वितरेतरयोग एवेत्यर्थः। विप्रतिषिद्धं चा। विरोधोऽत्र सहानवस्थानलक्षणः। अद्रव्याणान्तस्यैव सम्भवात्। अधिकरणं = द्रव्यम्। चो विभाषानुकर्षणार्थः। अद्रव्येति। 'अद्रव्यवाचिनाञ्चेद्विरुद्धार्थानामेवे 'ति विपरीतनियमस्तु न, व्याख्यानात्। इतरेतरयोग एवेति। 'विरुद्धार्थानाञ्चेदेकवचनद्वन्द्वोऽद्रव्यवाचिनामेव, स च वे'ति वचनव्यक्तेरिति भावः।

भवत्येवेति। विप्रतिषिद्धग्रहणाऽभावे त स न स्यात्, सामान्यतोऽद्रव्यवाचिनामेवेति नियमादिति भावः सूत्रोदाहरणन्तु शीतोष्णं, शीतोष्णे, सुखदुःखं, सुखदुःखे इत्यादि। विप्रतिषिद्धमेतावन्मात्रौक्तो शीतोष्णे जले इत्यत्रोभयापत्तिः नन्दकपाञ्चजन्यं नन्दकपाञ्चजन्यावित्यादौ समाहारद्वन्द्वापत्तिश्चेति बोध्यम् । न दधिपय। नियमप्रक्रमेऽपि नानेन नियमस्यैव निषेधः, ब्रह्मप्रजापत्यादिषु नियमाऽप्राप्तेः। तत्साहचर्यात्प्रकरणाच्च 'चार्थे द्वन्द्वः' इति सूत्रविहितसमाहारद्वन्द्वस्य, नियममात्रस्य च निषेधः। गणे द्विवचनान्तानामेव पाठाच्च। तदाह- नैकवदिति। यद्यदेकवचनद्वन्द्व विषयं शास्त्रं, विधायकं नियामकं वा प्राप्नोति तन्नेत्यर्थः। तेन 'दधिपयसी' इत्यादौ 'जातिरप्राणिनाम्' इत्यपि नेति बोद्ध्यम्। अधिकरणै। नियमो नेति। पूर्वसूत्रवत्सामान्यतोनिषेधे मानाऽभावान्नियमप्रकरणाच्च नियमस्यैव निषेधः। किं च वर्तिपदार्थस्य सङ्ख्याविशेषे बोधनीये सापेक्षत्वेनाऽसामर्थ्यात्समाहारद्वन्द्व प्राप्तेरेवाऽभावेन तन्निषेधो व्यर्थः। प्रधानस्य सापेक्षत्वात्। इतरेतरयोगस्तु भवत्येव। मम तु प्राण्यङ्गादिनियमादितरेतरयोगस्याऽप्राप्तौ तद्विधानेन चारितार्थ्य स्पष्टमेवेति भावः। परे तु इतरेतरयोगेऽप्युद्भूतावयवभेदसमूहस्यैव भाष्यरीत्या समासार्थत्वेन तस्यापि सापेक्षत्वादप्राप्तिः। किं च दन्तोष्ठद्वारकसम्बन्धेन दशत्वस्य समाहारेऽन्वयविवक्षायामस्त्येव समाहारे द्वन्द्वप्राप्तिः। किं च समाहारद्वन्द्वस्याऽप्राप्तौ द्वन्द्वश्चेत्यस्याप्यत्राऽप्राप्तिरिति कस्यानेन निषेधः ? नियमेन तत्प्राप्तिविषये एवेतरेतरयोगनिषेधनात्। तस्मात्पूर्वसूत्रवदयमप्युभयोर्निषेधः।

अतएवोत्तरसूत्रविषये समाहारद्वन्द्वसिद्धिः। सामर्थ्यनाऽसामर्थ्य समासकल्पनापेक्षयैवमन्वयकल्पनस्यैवौचित्यात्। मूले नियमो न स्यादित्यस्य नोऽपि नेत्यर्थः । समाहारे साक्षाद् शत्वान्वये तु दन्तोष्ठानीत्याहुः। समीप इत्यस्य सामीप्येन परिच्छेदे लक्षणा, अनुवृत्तस्य च षष्ठ्या विपरिणाम इत्याह- त्वस्य सामीप्येनेति। उपदशमिति। नवैकादशदन्तोष्ठसमूह इत्यर्थः। तत्र समाहारद्वन्द्वे समानलिङ्गवचनत्वादव्ययीभावस्यैवानुप्रयोगः। अत एव 'उपदशं दन्तोष्ठस्ये 'ति सिद्धम्। तत्र सामानाधिकरण्यन्तु समीपसमीपिनोरभेदविवक्षया बोद्ध्यम् । इतरेतरयोगे तु बहुव्रीहेरेवानुप्रयोगः। तस्य समीपिप्रधानत्वात्समानलिङ्गवचनत्वाच्चेति बोद्धयम्। आनऋतो। 'ऋतो विद्यायोनि' इत्यतो विद्यायोनीत्याद्यनुवर्तते। ऋदन्तानामिति। ऋत इत्यनुबर्तमाने पुनर्ऋत इत्युक्तिः सर्वावयवद्वारा द्वन्द्वविशेषणार्था। तेन पितृपितामहादौ नाऽऽनङ्। नकारोच्चारणमुरणरपरव्यावृत्त्यर्थम्। अत्र ऋकारस्य निर्दिश्यमानत्वेऽपि ङकारो मित्रावरुणावित्यादौ देवताद्वन्द्वविषयेऽन्त्यादेशार्थः। उत्तरपदे इति चाऽधिकारः। होतेति। एषां विद्याद्वारकैकयज्ञत्वित्तवकृतः सम्बन्धः। उत्तरपदाक्षिप्तपूर्वपदशब्दः केवलयौगिक इति ध्वनयन्नाह- होतृपोत्रिति। मातापितराविति। अत्र योनिकृतः। मण्डूकेति। अत एव मद्ध्ये न सम्बन्धः। वाक्यभेदेन च सम्बन्धः। ऋदन्तस्य पुत्रे आनडित्यर्थः। तेन तातपुत्रावित्यादौ न। इत्यादाविति। स्कन्दविशाखावित्यादि आदिशब्दार्थः। अग्नेः स्तुत्। सात्पदाद्योरित्यस्याऽपवादः। इद्वन्द्वौ। देवताद्वन्द्वे वृद्धिरूपोत्तरपदाऽसम्भवात् सौत्रलोपेन लुप्तमत्वन्तं वृद्धिपदमित्याह- वृद्धिमतीति। नन्वन्तरङ्गत्वात्पूर्वमानङीत्वे स्यातामतआह- अलौकिके इति। तद्धिताऽलौकिके इत्यर्थः। परिनिष्ठितात्तद्धितोत्पत्तेः। वृद्धिमत्त्वञ्चोत्तरपदस्य भाव्येव निमित्तमित्यर्थः। आग्नावैष्णवमिति। इत्वाऽभावादानङ्। द्यावाक्षामेति। 'द्यावाक्षामा रुक्मो अन्तर्विभाति' इत्यत्रत्यमिदम्। तत्र द्वन्द्वे द्यावादेशे षष्ठ्याः 'सुपां सुलुक्' इति डादेशः। 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोः प्रकृतिस्वर इति वेदभाष्ये स्पष्टम् । द्यावा चिदस्मै इति। द्यावाचिदस्मै पृथिवी सन्नमेते' इत्यत्रत्यमिदम्। 'चिदस्मै' इत्यनेन व्यवधानात्समासाऽभावनिर्णयः। इतरेतरापेक्षया द्विवचनम्। प्रमित्रयोर्वरुणयोरितिवत्। अत एव पदकाले 'पृथिवी-इति' इति प्रगृह्यं पठन्ति। 'वा छन्दसि' इति पूर्वसवर्णः। अन्ये त्वत्र द्योशब्दस्यैव द्विवचने णित्त्वे 'सुपां सुलुक्' इत्याकार इत्याहुः। मातरपितरा। एकशेषस्य धैकल्पिकत्वाद्द्वन्द्वः। अत्र पूर्वपदेऽरङादेशो निपात्यते, उत्तरपदाधिकारात् । उत्तरत्र तु 'ऋतो ङीति सिद्धम्। पदद्वयेऽपि तन्निपातनमित्यन्ये । इति द्वन्द्वः।।

पुमान् स्त्रिया। अत्र विभक्तावित्यनुवर्तते। विभक्तौ तदितरकृतविशेषविरहश्चेदित्यर्थः। अत एव जननीपरिच्छेत्तृवाचकमातृशब्दयोनैकशेषः। हंसाविति। स्त्रीव्यक्तेरपि हंसत्वेन स्त्रीत्वाऽनालिङ्गिताया एव बोधेन नात्र ङीष्। ब्राह्मणीवत्सश्च ब्राह्मणवत्सा चेत्यादौ तु नेदम्, प्रधाने कार्यसम्प्रत्ययात्प्रधानस्त्रीमात्रकृतविशेषे एवैतत्प्रवृत्तेः। नपुंसकम्। अन्यतरस्यामित्येकवच्चेत्यनेनैव सम्बद्ध्यरो, आनन्तर्यात्, त्वर्थचशब्दाच्चेत्याह– तञ्च
वेति। अनपुंसकेनेति किम् ? शुक्लञ्च शुक्लञ्च शुक्ले। 'अस्य'ग्रहणमस्यैवेकवद्भाव इति बोधनार्थम्। तेनान्यसूत्राणां समाहारद्वन्द्वविषये न प्रवृत्तिः। घटघटमित्यादित्वनभिधानान्न। एवञ्चानभिधानस्यावश्यकत्वेन द्वन्द्वमात्रस्यैकशेषविषये तदाश्रित्यैकशब्दस्यानेकार्थत्वञ्चाश्रित्यैकशेषप्रकरण भाष्ये प्रत्याख्यातम्।
अन्यथैकशेषारम्भेऽपि गाावित्यतो गायेगाायणबोधो न स्यात्, तस्य तदर्थकत्वाऽभावादिति दिक्। गुणे शुक्लादिपदानां पुंस्त्वादुणिपरताप्रकटनाय पटादिपदोपादानम्। एवञ्च गुणपरतायां नीलो रूपमित्याद्येव प्रयोगः। गुणिपरतायान विशेष्यनिघ्नता। 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्यमरोक्तेः। तद्वतीत्यस्य द्रव्ये विशेषणतापन्ना इत्यर्थ इति प्रामाणिकाः। तल्लक्षण एवेति किम् ? हिमहिमान्यौ। अत्र महत्त्वादिकृतोऽपि विशेषः। मातापितराविति। 'पितृर्दशगुणमाता गौरवेणातिरिच्यते' इत्युक्तेर्मातुरभ्यहितत्वात्पूर्वनिपातः। 'आनङ् 'ऋत' इत्यानङ् । श्वशरः। श्वश्वा अपि मातृतुल्यत्वोक्तेरभ्यर्हि तत्वम्। त्यदादीनि सर्वैः। तदादिभिरन्यैश्चेत्यर्थः। यत्परमिति। गणीयमत्र परत्वम्। अत्र द्विपर्यन्तानामिति नियमो नास्ति, 'अहञ्च भवांश्च आवाम्' इति भाष्योक्तेः। पुनपुंसकत इति। स्त्रीशेषेऽपीति भावः। पुनपुंसकयोस्त्विति। तयोः सहोक्तौ 'पुंनपुंसकतः' इति वचने परत्वान्नपुंसकं शिष्यते इत्यर्थः। इदं कैयटादौ स्पष्टम्। अत एव 'नपुंसकम्' इति सूत्रे भाष्ये शुक्लं च वस्त्रं, शुक्लश्च कम्बलः, तदिदं शुक्लं, ते इमे शुक्ले इत्युदाहृतं सङ्गच्छते। त्यदाद्यन्तर्गतयोरपि एकद्वयोर्नैकशेषः, अनभिधानात्। ध्वनितञ्चेदं सरूपसूत्रे भाष्ये। द्वन्द्वोऽप्येतयोर्न, एकादिनवान्तानां द्वन्द्वाऽभावस्य 'चार्थे' इति सूत्रशेषे भाष्ये ध्वनितत्वात्। एवञ्च 'एकद्विकरणे हेतू महापातकपञ्चके। तृणवन्मन्यते कोपकामौ यः पञ्च कारयन्' इति नैषधपद्ये 'एकद्विकरणे' इत्यसाध्वेव। अनेकपदषष्ठीतत्पुरुषोऽप्यसाधुरेवेति दिक् । अस्यापवादमाह– अद्वन्द्वेति। कुक्कुटमयूर्याविति। द्वन्द्वतत्पुरुषयोः परपदलिङ्गत्वेन तदधीनतैव विशेषणस्येति बोद्ध्यम्। तत्पुरुषे अर्धपिप्पल्यस्ता इत्यत्र विशेषो बोद्ध्यः। तच्चितोर्योग इत्यादौ तदित्यव्ययम् । ग्राम्यप। अत्राऽनपुंसकेनेत्यनुवर्तते। तदाह–पुमानिति। एतौ गावाविति। सङ्घशब्दश्च बहूनां समुदाये शक्त इति भावः। वत्सा इति। अपत्यमात्रवाचिनो क्तसशब्दस्य प्रकरणादिना तरुणपरत्वे इदं बोद्ध्यम्। वस्तुतो 'बर्करा इमे' इति प्रत्युदाहरणम्। वर्करः = तरुणः पशुः। एकशेषे कृत इति। अन्तरङ्गत्वाद्विभक्त्युत्पत्तेः प्रागित्यर्थः। तेनेति। द्वन्द्वत्वसमासत्वयोरभावेनेत्यर्थः। एकवदिति। द्वन्द्वश्च प्राणी'त्येतत्कृतो नियम इत्यर्थः। पन्थानाविति। 'इतोऽत्' इति सूत्रन्तु पन्था इत्यत्र, मथिनादौ च चरितार्थम्। कृतद्वन्द्वानामेकशेषे हि द्वन्द्वाऽलौकिकविग्रहवाक्ये ऋक्पूरित्यनेन तत्प्राप्तिर्दुर्वारा । एवञ्च वैरूप्यादेकशेषो न स्यात्। एकं पथीति, अपरं पथेति। न चोत्तरमनर्थकम्, विशिष्टरूपोपादानाऽभावेन सरूपसूत्रेऽर्थवत्परिभाषाया अप्रवृत्तेः। एवषैतद्भाष्ययोजनार्थमुत्तरपदावयवत्वस्वीकारः कैयटोक्तो विफल एव। किञ्चैवंयाणामपीत्येकशेषस्य दुर्वारत्वाद्भाष्याऽसङ्गतिः। मम तूत्तरखण्डस्याऽनर्थकत्वान्नतत्प्राप्तिरिति भावः।


सन्दर्भग्रन्थाः

1. अष्टा. सू. 2–2–29
2. अष्टा. सू. 2–2–30
3. 'अष्टा. सू. 2–2–31
4. अष्टा. सू.8–4–4
5. 'अष्ट सू..2–2–3
6. अष्ट सू 2–2–33
7. अष्टा.सू.2–2–34